International Journal of Sanskrit Research 2019; 5(4): 154-156

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(4): 154-156
© 2019 IJSR
www.anantaajournal.com
Received: 22-05-2019
Accepted: 24-06-2019

**सन्दीपवसन्तजोशी**
शोधच्छात्रः, रा.सं.सं. राजीवगान्धीपरिसरः,
शृङ्गेरी, कर्नाटकम्, भारत

**Correspondence**
**सन्दीपवसन्तजोशी**
शोधच्छात्रः, रा.सं.सं. राजीवगान्धीपरिसरः,
शृङ्गेरी, कर्नाटकम्, भारत

# अधिकालङ्कारविमर्शः

**सन्दीपवसन्तजोशी**

## प्रस्तावना

सत्स्वनेकेषु भूषणेषु वाग्भूषणमेव सर्वाणि भूषणान्यतिशेते। सालङ्कृता वाग्यथा सहृदयमाह्लादयति न तथा अनलङ्कृता। लौकिकभाषायाम् अपि स्वोक्तिं प्रभावपूर्णतया समुपस्थापयितुं वाग्वैदग्ध्यमाश्रयते मनुष्यः । वक्तृभिर्विन्यस्ताश्चमत्कृतिपूर्णाः श्रुतिरञ्जनकरा एते पदपादविन्यासाः कस्य मानसं न तोषयन्ति ? उक्तं च सायणाचर्येण-

ओजो रञ्जनमेव वर्णरचना चित्रा न कस्य प्रिया
नानालङ्कृतयो न कस्य मनसः सन्तोषमातन्वते ।
काव्ये किन्तु सतां चमत्कृतिकृताः सूक्तिप्रबन्धाः स्फुटं
तीक्ष्णाग्रा झटिति श्रुतिप्रणयिनः कान्ताकटाक्षाविव ॥[1]

अत एव विभिन्नैर्विकल्पैः सालङ्कृतामिमां वाचं प्रस्तोतुं मनुष्यः प्रयतते। अनन्ता एते वाग्विकल्पाः एव अलङ्कारतां भजन्ते। उक्तं चानन्दवर्धनाचार्येण-

अनन्ता हि वाग्विकल्पास्तत्प्रकारा एव चालङ्काराः।[2]

इति । अलङ्कारतां प्राप्तवतामेतेषां वाग्विकल्पानां सङ्ख्या निर्णेतुं न शक्या । यतो हि भरतादारभ्य अर्वाचीनालङ्कारिकान्तं यावदेषा सङ्ख्या प्रवर्धमाना एव दृश्यते ।

अनेकविधाः एते अलङ्काराः सन्ति । शब्दालङ्काराः अर्थालङ्काराः शब्दार्थोभयालङ्काराः च । अर्थालङ्काराणामपि सादृश्यमूलकाः, विरोधमूलकाः, शृङ्खलामूलकाः, न्यायमूलकाः, गूढार्थप्रतीतिमूलकाश्चेत्यादयः भेदाः दृश्यन्ते ।

अलङ्काराणां वर्गीकरणम्

आलङ्कारिकैः कृतम् अलङ्काराणां वर्गीकरणं बृहदलङ्कारमीमांसायां नागेशचन्द्रपाण्डेयमहोदयेन ऐतिहासिकरूपेण वैज्ञानिकरूपेण च द्विधाविभाजितम् । ऐतिहासिकवर्गीकरणे सः भामहोद्भटयोः वर्गीकरणं स्थापितवान् । भामहः त्रिषु वर्गेषु अलङ्कारान् व्यवस्थापितवान् । उद्भटः षट्सुवर्गेषु अलङ्कारान् विभाजितवान् । एतयोर्वर्गीकरणे एकस्मिन् वर्गे स्थापितानामलङ्काराणां सादृश्यं समानधर्मता वा कुत्रापि न प्रतीयते । अतः एतयोर्वर्गीकरणम् ऐतिहासिकं मन्यते नागेशचन्द्रमहोदयः । वैज्ञानिकवर्गीकरणे सः रुद्रटरुय्यकविद्यानाथादिभिः कृतानि वर्गीकरणानि स्थापितवान् ।

अलङ्काराणां मौलिकतत्त्वाधारेण कृतानि एतानि वर्गीकरणानि सर्वथा परिपूर्णानि इति वक्तुं न शक्यते । यतो हि रुद्रटः कांश्चनालङ्कारान् द्वयोः वर्गयोः स्थापयति । रुय्यकः गूढार्थप्रतीतिमूलकं समासोक्त्यलङ्कारं विशेषणविच्छित्तिमूलके स्थापितवान् तेन सार्धमेव श्लेषं परिकरं च स्थापितवान् । एवं सत्यपि उत्तरकालीनाः आलङ्कारिकाः वर्गीकरणार्थं न्यूनाधिकरूपेण रुय्यकमनुकुर्वन्ति । तत्रापि रुय्यकेनोक्तः विरोधवर्गः प्रायः सर्वैरेव स्वीकृतः । रुय्यकेनअस्मिन्वर्गे१२अलङ्काराःअन्तर्भाविताः। विरोधः, विभावना, विशेषोक्तिः, अतिशयोक्तिः, असङ्गतिः, विषमः, समः, विचित्रः, अधिकः, अन्योन्यः, विशेषःव्याघातःच।

## अधिकालङ्कारः

रुय्यकेन विरोधवर्गे अन्तर्भावितेष्वलङ्कारेषु अन्यतमोऽस्ति अधिकालङ्कारः । अधिकालङ्कारे आधाराधेयभावस्य

---

[1]सुभाषितसुधानिधिः, सायणाचार्यः, प्ररोचनापद्धतिः १३

[2]आनन्दवर्धनाचार्यः, ध्वन्यालोकः३.३६वृत्तिः

प्राधान्यं दृश्यते । आधाराधेययोः अननुरूप्यमेवास्य अलङ्कारस्य मौलिकं तत्त्वमस्ति। आधाराधेययोः अननुरूप्यादेवायम् अलङ्कारः विरोधवर्गे स्थापितः । एतद् आधाराधेययोः अननुरूप्यं वास्तविकं न अपि तु कवि प्रतिभोत्थापितमपेक्ष्यते।

**लक्षणविमर्शः**

अधिकालङ्कारस्य प्रथमतया उल्लेखः रुद्रटेण कृतः ।
यत्रान्योन्यविरुद्धं विरुद्धवलबत् क्रिया प्रसिद्धं वा।
वस्तुद्वयमेकस्माज्जायत इति तद् भवेदधिकम् ॥
यत्राधारे सुमहत्याधेयमवस्थितं तनीयोऽपि।
अतिरिच्येत कथंचित्तदधिकमपरं परिज्ञेयम् ॥[3]

अस्मिन् लक्षणे सः अधिकालङ्कारस्य त्रीणि तत्त्वानि उपस्थापितवान् । एकस्मात् कारणात् परस्परविरुद्धवस्तुनः उत्पत्तिः, परस्परविरुद्धस्वभाववतोः वस्तुनोः उत्पत्तिः, आधारस्यापेक्षया आधेयस्याधिक्यं च । एकस्मात् कारणात् विरुद्धवस्तुनः उत्पत्तिर्यथा –

मुञ्चति वारि पयोदो ज्वलन्तमनलं च यत्तदाश्चर्यम् ।[4]

उदाहरणेऽस्मिन् यः मेघः जलं वर्षति स एव अग्निमपि वर्षति इति प्रतिपादितम् । अत्र एकस्मादेव मेघात् विरुद्धवस्तुनोः जलानलयोः उत्पत्तिः दर्शिता । परस्परविरुद्धस्वभाववतोः वस्तुनोः उत्पत्तिर्यथा-

उदपद्यत नीरनिधेर्विषममृतं चेति तच्चित्रम् ।[5]

**अस्मिन् उदाहरणे समुद्रात् विषामृतयोः विरुद्धस्वभाववतोः उत्पत्तिः कथिता । आधारस्यापेक्षया आधेयस्याधिक्यं यथा-**

जगद्विशाले हृदि तस्य तन्वी प्रविश्य साऽस्ते स्म तथा यथा तत् ।
पर्याप्तमासीदखिलं न तस्यास्तत्रावकाशस्तु कुतोऽपरस्याः ॥[6]

अस्मिन् उदाहरणे 'संसारसदृशे विशाले हृदये सा तन्वी यथाकथञ्चित् स्थितवती' इत्युक्त्वा हृदयरूपाधारापेक्षया आधेयस्याधिक्यं कथितम् । रुद्रटेण प्रतिपादितेषु तत्त्वेषु तृतीयतत्त्वमेव तदुत्तरकालीनैः आलङ्कारिकैः अधिकालङ्कारस्य लक्षणत्वेन समानरूपेण किञ्चित् परिवर्तनेन वा स्वीकृतं दृश्यते । मम्मटेन द्विविधः अधिकालङ्कारः स्वीकृतः । आधेयाधारयोः अपेक्षया तनुत्वेऽपि अधाराधेययोः महत्त्वं यत्र वर्ण्यते तत्र अधिकालङ्कारः भवति ।

महतोर्यत्महीयांसावाश्रिताश्रययोः क्रमात् । आश्रयाश्रयिणौ स्यातां तनुत्वेऽप्यधिकं तु तत् ॥[7]

आधेयापेक्षया आधारस्य तनुत्वेऽपि महत्त्वं यथा –

अहो विशालं भूपाल भुवनत्रितयोदरम् । माति मातुमशक्योऽपि यशोराशिर्यदत्र ते ॥[8]

अत्र भुवनत्रितयोदरे मातुम् अशक्यः अपि यशोराशिः अवकाशं लभते । आधारस्य तनुत्वेऽपि महत्त्वं वर्णितम् । आधारापेक्षया आधेयस्य तनुत्वेऽपि महत्त्वंयथा –

युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकाशमासत ।
तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः ॥[9]

यस्मिन् कृष्णशरीरे युगान्ते चतुर्दशभुवनानि उपविशन्ति तस्मिन् शरीरे तपोधनागमनेन उद्भूताः प्रीतयः अवकाशं न प्रापुः । उदाहरणेऽस्मिन् आधेयस्य तनुत्वेऽपि महत्त्वं वर्णितम् ।मम्मटोत्तरैः प्रायः सर्वैरप्यलङ्कारिकैः रुय्यकमम्मटयोः एवानुकरणं कृतं दृश्यते ।
अधिकालङ्कारे कविप्रतिभोत्थापितमाधिक्यमेव मूलं तत्त्वमस्ति इति पूर्वम् उक्तम् । अलङ्कारसर्वस्य टीकाकारेण जयरथेन रुय्यकस्य उदाहरणं स्वाभाविकाधिक्यात् निराकृतम् । *तच्च(आधिक्यं) आश्रयाश्रयिणोः कविप्रतिभाकल्पितमेव ग्राह्यम् । न पुनर्वास्तवम् । तेन चारुत्वाप्रतीतेः ।तेन नभसो द्युप्रभृतीनां चान्योन्यापेक्षया वैपुल्यं पारिमित्यं च वास्तवमेवेत्यनुदाहरणमेतत् ।'* [10]रुय्यकोक्तमुदाहरणमित्थम् –

द्यौरत्र क्वचिदाश्रिता प्रविततं पातालमत्र क्वचित्
क्वाप्यत्रैव धरा धराधरजलाधारावधिर्वर्तते ।
स्फीतस्फीतमहो नभः कियदिदं यस्येत्थमेवं विधै-
र्दूरे पूरणमस्तु शून्यमिति यन्नामापि नास्तं गतम् ॥[11]

विश्वेश्वरपण्डितस्य मतानुसारम् अस्मिन् उदाहरणे वृत्तिनियामकसम्बन्धेन पर्वतादीनाम् आश्रयताकविकल्पिताएव।*वृत्तिनियामकसम्बन्धेनाकाशस्य पर्वतादीनामुक्तानामाश्रयतायाः कविनैव कल्पितत्वात् ।* [12] अतः उदाहरणमिदम् अधिकालङ्कारस्यैव ।
शोभाकरमित्रः अधिकं विषमे अन्तर्भावयति । *'द्यौरत्र क्वचिदाश्रिता इत्यादावाकाशादराश्रयस्य महत्त्वे दिवादेराश्रयिणोऽल्पत्वमित्याश्रयाश्रयिणोरनुरूप्यमधिकमित्यधिकालंकारो न वाच्यः । अत्राप्यननुरूपसंघटनस्य विद्यमानत्वाद् विषमालङ्कारान्तर्भावोपपत्तेः । अन्यथा गुणगुणिनोरनानुरूप्यं विगुणमित्यलङ्कारान्तरलक्षणप्रणयन प्रसङ्गः । एवमप्याश्रयस्याल्पत्वादाश्रयिणोऽमहत्त्वेऽनानुरूप्ये विषमालङ्कार एव ।*[13]

**तुलनात्मकविमर्शः**

**अधिकं – विषमम्**

शोभाकरमित्रेण अननुरूपसङ्घटनस्य विद्यमानत्वात् अधिकस्य विषमे अन्तर्भावः कृतः । परन्तु अधिके द्वयोः पदार्थयोः आश्रयाश्रयिभावः भवति, विषमे द्वयोः पदार्थयोः कोऽपि सम्बन्धः न भवति तौ निरपेक्षौ भवतः । उक्तं च विमर्शिन्याम् *'विषमे चानन्यापेक्षत्वेन स्वत एवानुरूपयोः सङ्घटनमित्यनयोर्महान्भेदः।'* [14] कुवलयानन्दस्य रसिकरञ्जिनीटीकायाम् आधाराधेयतायाम् अननुरूपसङ्घटनत्वे सति अधिकं, तद्भिन्नसम्बन्धे तु विषमं स्वीकृतम् । '*अननुरूपसङ्घटनस्याधाराधेयरूपतायामधिकं तदतिरिक्तसामानाधिकरण्यादिसम्बन्धरूपतायां च विषममित्येवाधिकविषमयोर्भेदः ।'*[15]

[3]कव्यालङ्कारः ९.२८
[4]कव्यालङ्कारः ९.२७
[5]कव्यालङ्कारः ९.२७
[6]कव्यालङ्कारः ९.२९
[7]काव्यप्रकाशः सू.१९५ का.१२८
[8]काव्यप्रकाशः १०.५४२
[9]काव्यप्रकाशः १०.५४३
[10]विमर्शिनीव्याख्या पृ.१३४
[11]अलङ्कारसर्वस्वम् ४८
[12]अलङ्कारकौस्तुभम् पृ.३८०
[13]अलङ्काररत्नाकरः पृ.१०७
[14]अलङ्कारसर्वस्वम् १३४
[15]कुवलयानन्दरसिकरञ्जिनीटीका पृ.४०१

**अधिकम् – अल्पम्**

अधिकालङ्कारे आधाराधेययोः परस्परापेक्षया आधिक्यं वर्ण्यते। अल्पालङ्कारे तु आधेयस्यापेक्षया आधारस्य अल्पत्वं वर्ण्यते।यथा कुवलयानन्दे

अल्पं तु सूक्ष्मादाधेयाद्यदाधारस्य सूक्ष्मता। मणिमालोर्मिका तेऽद्य करे जपवटीयते ॥[16]

अत्र आधेयभूतायाः ऊर्मिकायाः सूक्ष्मत्वे अपि आधारभूतस्य करस्य सूक्ष्मत्वं प्रतिपादितम्। अधिकस्य विरुध्दः अलङ्कारोऽयम्।

**अधिकं – विशेषः**

द्वयोः अपि आधाराधेयभावः भवति। अधिके आधाराधेययोः अननुरूप्यं वर्णितं भवति। विशेषे आधाराभावे अपि आधेयस्य वर्णनम्, एकस्य आधेयस्य बहुषु आधारेषु वर्णनं भवति। अधिके आधाराधेययोः द्वयोरपि अवस्थानम् आवश्यकम्। विशेषे तु आधाराभावेऽपि आधेयस्य वर्णनं भवति।

**निष्कर्षः**

आधाराधेयभावमाश्रितोऽयमलङ्कारः अस्ति। आधाराधेययोः एकस्य पृथुलत्वेऽपि अपरस्य पृथुलत्वं कथनेनायमलङ्कारः भवति। अलङ्कारेऽस्मिन् वर्णितमाधिक्यं कविप्रतिभोत्थापितमपेक्ष्यते। कविप्रतिभोत्थापितमिदमाधिक्यं चमत्कारजनकं भवति। पृथुलादाधारात् आधेयाद्वा अपरस्याधिक्यम् अत्र वर्ण्यते परन्तु आधाराधेययोः पृथुलत्वमिदं लोकप्रसिद्धमावश्यकम्। अत एव भूमण्डलजलधिगगनमेर्वादिरूपं पृथुलत्वमत्र अपेक्ष्यते। एतेषामपेक्षया अपरस्याधिक्यकथनमेव चमत्कारं जनयति। आधाराधेययोः अननुरूप्यत्वात् अलङ्कारोऽयं विरोधमूलकालङ्कारेष्वन्तर्भवति।

**सन्दर्भग्रन्थसूची**


1. अलङ्कारकौस्तुभम् विश्वेश्वरपण्डितः, निर्णसागरप्रेस, मुम्बई, १८९८
2. अलङ्काररत्नाकरः शोभाकरमित्रः ओरिएण्टल् बुक एजेन्सि पूणे, १९४२
3. अलङ्कारसर्वस्वम् रुय्यकः, निर्णयसागरप्रेस, मुम्बई १८९३
4. काव्यप्रकाशः मम्मटः, चौखम्बा संस्कृत संस्थानम्, वाराणसी १९८२
5. काव्यालङ्कारः रुद्रटः, चौखम्बा विद्याभवन, वाराणसी, १९६६
6. कुवलयानन्दः अप्पय दीक्षितः, चौखम्बा संस्कृत सिरीज् वाराणसी २००६
7. ध्वन्यालोकः आनन्दवर्धनः, निर्णयसागरप्रेस, मुम्बई १९२८
8. सुभाषितसुधानिधिः सायणाचार्यः, कर्नाटक युनिव्हर्सिटी, धारवाड १९६८


[16]कुवलयानन्दः श्लो. ९७